# संस्कृतवार्ताः

25.04.2025

सायम् - 06:20

मुख्यवार्ता:

- जम्मू-कश्मीरे उपराज्यपाल: मनोजसिन्हा अथ सेनामुख्य: उपेन्द्र द्विवेदी च समग्रसुरक्षास्थितेः विषये चर्चां कृतवन्तौ।
- केन्द्रेण सर्वोच्च-न्यायालये वक्फ अधिनियम संशोधनं रक्षायता उक्तं यत् नूतना विधि: सम्पत्ति-प्रबंधनं आधुनिकी करोति।
- उत्तरकश्मीरस्य बंदीपोरामण्डले अद्य प्रात: एकः आतङ्कवादी सहचरः मारितः।
- विश्वनेतार: पहलगाम आतङ्कवाद्याक्रमणस्य निन्दां कृतवन्त:।
- ऋतु-विज्ञान-विभागेन अनुमानितम् यत् उत्तरभारते तीव्रतापतरंगा: प्रवहन्ति अथ पूर्वोत्तर-भारते अतिवृष्टि: जायते।

सेनाप्रमुखः-श्रीनगरम्

पहलगाम-आतङ्की-आक्रमणस्य पश्चात् सुरक्षा-स्थितेः समीक्षां कर्तुं सेनाप्रमुखः जनरल् उपेन्द्र-द्विवेदी अद्य श्रीनगरम् प्राप्तः। श्रीनगरे स्थितस्य चिनारकोर-इत्यस्य जनरल-आफिसर-कमाण्डिङ्ग्-इति सैन्याधिकारिणा, आतङ्कवादिनः विरुद्धं क्रियमाणानां समग्र-सुरक्षा-स्थितेः, अभियानानां च विषये, पाकिस्तान-सेनायाः नियन्त्रणरेखायाः सीमायां युद्धविरामस्य उल्लङ्घनस्य प्रयासस्य च विषये सेनाप्रमुखम् अवगमनं कारितम्। जनरल् द्विवेदी उपराज्यपालेन मनोजसिन्हा इत्यनेन सह मिलित्वा, आक्रमणानन्तरं समग्रसुरक्षास्थितेः विषये चर्चां कृतवान्। सेनाप्रमुखः दक्षिणकश्मीरस्य अनन्तनागमण्डलस्य बैसरनवनग्रामे पहलगाम-आक्रमणस्थलस्य भ्रमणस्य सम्भावना अस्ति। एतन्मध्ये अस्माकं संवाददाता अवदत् यत् उत्तरकश्मीरस्य कुपवाड़ामण्डले नियन्त्रणरेखायाः अनेकस्थानेभ्यः पाकिस्तानसेनायाः युद्धविरामस्य उल्लङ्घनस्य सूचनाः सन्ति।

केन्द्र-सर्वोच्चन्यायालय-वक्फ:

केन्द्रेण अद्य सर्वोच्चन्यायालये उक्तं यत् सर्वकारीय-निज-भूमिषु अतिक्रमणं कृत्वा दुरुपयोगं निवारयितुं वक्फ-मण्डलस्य परिचालनेषु पारदर्शितां सुनिश्चेतुं च पञ्चनवत्यधिक-ऊनविंशति-तमे वर्षे वक्फ-अधिनियमे संशोधनं अभवत्। अल्पसंख्यककार्याणां मन्त्रालयेन एकस्मिन् -प्रतिवेदने त्रयोदशोत्तर-द्विसहस्रतमे वर्षे संशोधनात् परं वक्फक्षेत्रे षोडशोत्तरैकशत-प्रतिशतं वृद्धिः अभवत् इति उद्धृत्य उक्तं यत् अनेकानि वक्फमण्डलानि गुप्तरूपेण कार्यं कुर्वन्ति, येन ते समग्रसम्पत्त्याः अभिलेखानाम् उपरोपणे असफला: भवन्ति। केन्द्रेण उक्तं यत् पञ्चविंशत्यधिक- द्विसहस्रतम-वर्षस्य वक्फ (संशोधन) अधिनियमस्य उद्देश्यं धार्मिकप्रथा: प्रभाविकरणं विना सम्पत्तिप्रबन्धनस्य आधुनिकीकरणम् अस्ति।

बंदीपोरा – एन्काउन्टर

जम्मू-कश्मीरे उत्तरकश्मीरस्य बंदीपोरामण्डलस्य बाजिपोराकुलनारक्षेत्रे अद्य आतङ्कवादविरोधी अभियाने एकः आतङ्कवादी सहचरः मारितः। हत: आतङ्कवादीसहचर: लश्कर-ए-तैबा- इत्यातङ्कवादीसङ्घटनस्य सदस्यः अल्ताफ् लल्ली इति परिचितः। उत्तरकश्मीरस्य बन्दीपोरामण्डले गोलीकाप्रहारस्य भयंकर-आदानप्रदानस्य अनन्तरं वनक्षेत्रे भारतीय-सैन्य-जम्मू-कश्मीर-आरक्षक- संयुक्तबलयोः आतङ्कवादी-अन्वेषण-अभियानं निरन्तरं प्रचलति।

विश्वनेतार: पहलगाम

ब्रिटिश-प्रधानमन्त्री कीर-स्टार्मर: अथ डच-प्रधानमन्त्री डिक-शूफ: अद्य पहलगाम-आतङ्क्याक्रमणस्य निन्दां कृतवन्तौ। श्रीस्टार्मर: दूरभाषामाध्यमेन प्रधानमन्त्रिणं श्रीमोदिनं सम्पर्कं कृत्वा निर्दोष-नागरिकाणां हत्यायां दु:खसंवेदनां प्राकटयत्। अन्यत्र श्रीशूफ इत्यनेनापि उपर्युक्त-विषयं प्रति संवेदना: प्रकटिता:। प्रधानमन्त्री श्रीमोदी द्वाभ्यामपि आभारभारं प्रकटयन् उक्तवान् यत् अग्रेऽपि आतङ्कवादस्य विरुद्धं कार्याचरणे तयो: समर्थनम् अपेक्षते।

## डॉ. के. कस्तूरीरंगन-निधनम्

प्रधानमन्त्री श्रीनरेन्द्रमोदी भारतस्य वैज्ञानिकशैक्षिकयात्रायाः परमपुरुषस्य डॉ. के. कस्तूरीरंगनवर्यस्य निधनविषये श्रद्धांजलिं प्रकटितवान् । सामाजिक-संजालीय-माध्यमेन श्री-मोदी अवदत् यत् तस्य दूरदर्शी-नेतृत्वं, राष्ट्राय निःस्वार्थयोगदानं च सर्वदा स्मर्यते। प्रधानमन्त्रिणा प्रकाशितं यत् डॉ कस्तूरीरङ्गनः भारतस्य अन्तरिक्षकार्यक्रमं नूतनोन्नतस्थानं प्रेषयन्, अतीव परिश्रमेण इसरो इत्यस्य सेवां कृतवान्। श्रीमोदी अवदत् यत् तस्य नेतृत्वं महत्त्वाकांक्षायुतानाम्, उपग्रह-प्रक्षेपणानां साक्षी अपि अभवत्। प्रधानमन्त्रिणा मोदिना उक्तं यत्, राष्ट्रिय-शिक्षानीतेः प्रारूपणकाले, भारते, शिक्षणं अधिकं समग्रं, अग्रे-दृष्टिशीलं च भवतु इति सुनिश्चित्य, डॉ. कस्तूरीरङ्गनेन कृत-प्रयत्नस्य कृते भारतं सदैव कृतज्ञः भविष्यति। मोदी अवदत् यत्, सः अनेकेषां युवानां वैज्ञानिकानां शोधकर्तृणां च उत्कृष्टः मार्गदर्शकः अपि आसीत्।

## फ्रान्स् देशस्य राष्ट्रपतिः

फ्रान्स् देशस्य राष्ट्रपतिः इमैनुएल मैक्रों जम्मूकश्मीरस्य पहलगामे संजातस्य आतंकी-आक्रमणस्य विषयं ज्ञात्वा उक्तवान् यत् फ्रान्स देशः भारतेन अथ भारतीयैः सह दृढतया स्थितः वर्तते । ह्यः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह दूरभाषमाध्यमेन सम्भाषयन् राष्ट्रपतिः मैक्रों आतङ्की-आक्रमणस्य कठोरनिन्दां कृतवान् अथ गहन-संवेदनामपि प्राकटयत् । अग्रेऽपि सः इदमुक्तवान् यत् फ्रान्स् देशः तस्य सहवर्तिभिः सह यत्र क्वापि अपेक्षा वर्तते तत्र आतंकवादस्य विरुद्धं युद्धाय सन्नद्धो वर्तते । अवधेयमस्ति यत् सम्पूर्णं विश्वं पहलगाम-आतङ्की-आक्रमणस्य निन्दाम् अकरोत् ।

## राष्ट्रिय-मानवाधिकार-आयोगः

राष्ट्रिय-मानवाधिकार-आयोगेन जम्मूकश्मीरस्य पहलगामे आतङ्कवादिभिः निर्दोष-नागरिकाणां हत्यायाः कठोरनिन्दा कृता । एकस्मिन् वक्तव्ये आयोगेन उक्तं यत् आतंकवादे प्रत्यक्षेण परोक्षेण वा संलिप्तानाम् आततायिनां विरुद्धं कठोरदण्डदानस्य समयः अधुना आगतोऽस्ति अथ च ते आततायिनः एव अस्य मानवतायाः विरुद्धं कृतापराधस्य उत्तरदायिनः सन्ति ।

## दिल्ली-पिधानम्

पहलगामे आतङ्कवादी-आक्रमणं विरुद्ध्य अद्य राष्ट्रिय-राजधानि-देहल्याः अनेकाः विपण्यः पिहिताः आसन् । जनाः आतङ्क्याक्रमणे मृतेभ्यः श्रद्धांजलिं प्रदातुं चान्दनी-चौकतः रेड्-फोर्ट् इति रक्तदुर्गपर्यन्तं पथप्रदर्शनं कुर्वन्तः दृष्टाः । अखिल-भारतीय-व्यापारी-परिसङ्घस्य महासचिवः अथ दिल्ली-भाजपा-संसदः प्रवीण-खण्डेलवालः उक्तवान् यत् देहल्यां नवशताधिकानि आपणानि सम्पूर्णरूपेण पिहितानि वर्तन्ते ।

## सिन्धिया - आतङ्क्याक्रमणम्

केन्द्रीयमन्त्रिणा ज्योतिरादित्य-सिन्धिया इत्यनेन पहलगाम- आतङ्क्याक्रमणस्य निन्दां कुर्वता उक्तं यत् अमानवीयतत्त्वैः देशस्य आत्मनि प्रहारं कर्तुं प्रयत्नः कृतः परञ्च भारतं इतोपि द्रुततरं उच्चतरं च उत्तिष्ठति। नवदिल्ल्यां एकस्मिन् कार्यक्रमे प्रवदन् मन्त्री उक्तवान् यत् भारतस्य जनाः, प्रत्येकस्मिन् राज्ये, प्रत्येकस्याम् आस्थायां, एकस्वरेण च एकत्रिताः सन्ति।

## ऋतुविज्ञानविभागः

ऋतुविज्ञानविभागेन पञ्जाब, हरियाणा, दिल्ली, उत्तरप्रदेश, राजस्थान, मध्यप्रदेशेषु च आगामिषु चतुर्दिनेषु उष्णताप-तरङ्गस्य स्थितेः पूर्वानुमानं कृतम् अस्ति। अरुणाचलप्रदेश, असम, मेघालय, नागालैण्ड्, मिजोरम, त्रिपुराराज्येषु प्रचण्डवृष्टेः सम्भावना वर्तते। ऋतुविभागेन उक्तं यत् अनेकेषु राज्येषु तापमानं त्रीणि-तः पञ्च डिग्रीपर्यन्तं वर्धितुं शक्नोति। आगामिषु षड् दिवसेषु पञ्जाब-हरियाणा-दिल्ली-प्रदेशेषु अधिकतमं तापमानं द्वाभ्यां त्रीणि डिग्री सेल्सियसपर्यन्तं वर्धितुं शक्नोति, उत्तरप्रदेशे च सप्तचत्वारिंशत् डिग्रीपर्यन्तं तापमानं भवितुं शक्यते । विभागेन झारखण्डे, तमिलनाडुराज्ये, पुडुचेर्याम्, कराईकले, केरलराज्ये, माहे, तटीयान्ध्रप्रदेशे, यनम-रायलसीमायां च इत्येतेषु स्थानेषु उष्णार्द्र-ऋतोः पूर्वानुमानं कृतम् अस्ति। अरुणाचलप्रदेश-असम-मेघालय-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुराराज्येषु च प्रचण्ड-वृष्ट्याः सम्भावना वर्तते ।

## आईपीएल

आई.पी.एल. इत्येतस्यां विशंतिप्रति-विंशति-क्रिकेट्-मालिकायाम् चेन्नई नगरस्य एम्.ए. चिदम्बरं क्रीडांगणे अद्य चेन्नै-सुपर-किंग्स-सनराइजर्स-हैदराबाद-दलयोर्मध्ये द्वन्द्वं क्रीडिष्यते। द्वन्द्वं सायं सार्धसप्तवादने आरप्स्यते। गत-रात्रौ बेङ्गलुरूनगरस्य एम्. चिन्नास्वामि-क्रीडाङ्गणे क्रीडिते द्वन्द्वे रॉयल-चैलेन्जर्स-बेङ्गलुरू-दलेन राजस्थान-रॉयल्स-दलम् एकादश-धावनङ्कैः पराभूतम्।

।। इति वार्ताः ।।